काम्य' इत्यूर्ध्वेति यावत् लिङ्गज्ञानं उद्बोधकम् उद्बोधकानामानन्त्यादादिपदं ज्ञानात्परतोयोजनीयं तस्य क्रमात् स्मरणक्रमः यदि च युगपदुद्बोधकानि तदा तावद्विषयकमेकं स्मरणमिष्यत एव यथा पदज्ञानादाविति मन्तव्यम् इत्तिः" । प्रणिधानादीनि च स्मृतिकारणानि तत्रैवोक्तानि । 'प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रित सम्बन्धानन्तर्य्यवियोगैककार्य्यविरोधातिशयप्राप्तिव्यवधान सुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्म्माधर्म्मनिमित्तेभ्यः" "स्मरणमित्यनुवर्त्तते निमित्तशब्दस्य द्वन्द्वात् परं श्रुतस्य प्रत्येक मभेदेनान्वयः । प्रणिधानं मनसोविषयान्तरसञ्चारवारणम्, निबन्धएकग्रन्थोपनिबन्धनं यथा प्रमाणेन प्रमेयादिस्मरणम्, अभ्यासः संस्कारबाहुल्यम्, एतस्य यद्यपि नोद्बोधकत्वं तथापि तादृशे शीघ्रमुद्बोधकसमवधानं स्यादित्याशयेन तदुपन्यासः । अभ्यासोदृढतरसंस्कारः उद्बोधकत्वे नोक्त इति केचित् लिङ्गं व्याप्यं व्यापकस्य स्मारकं, लक्षणं यथा कपिध्वजादि अर्जुनादेः, सादृश्यं देहादेः । परिग्रहः स्वीकारस्तस्य स्वस्वामि भावोऽर्थः तदेकतरेणान्यतरस्मरणम्, आश्रयाश्रितौ राजादि तत्परिजनौ परस्परस्मारकौ, सम्बन्धोगुरुशिष्यभावादिः, गोवृषन्यायात् पृथगुक्तः । आनन्तर्य्यं प्रोक्षणावघातादेः, वियोगोयथा दारादेः, एककार्य्याः अन्तेवासिप्रभृतयः परस्परस्मारकाः । विरोधादहिनकुलादेरन्यतरेणापरस्मरणम् । अतिशयः संस्कारउपनयनादिराचार्य्यादिस्मारकः, प्राप्तिर्धनादेर्दातारं स्मारयति, व्यवधानमावरणं यथा खड्गादेः कोषादि । सुख दुःखयोरन्यतरेणापरस्य ताभ्यां तत्प्रयोजकस्य वा स्मरणम्, इच्छाद्वेषौ यद्विषयकतया गृहीतौ तस्य स्मारकौ, भयं मरणादेर्भयहेतोर्व्वा स्मारकम्, अर्थित्वं दातुः, शास्त्रादेः क्रिया वाय्वादेः, रागाल्लीतेः पुत्रादेः स्मरणं," धर्म्माधर्म्माभ्यां जन्मान्तरानुभूतसुखदुःखसाधनयोः प्रागनुभूत सुखादेश्च स्मरणमिति । तेषु च किञ्चित्, स्वरूपसत्किञ्चिच्च ज्ञातमुद्बोधकं शिष्यव्युत्पादनाय चायं प्रपञ्चः" इत्तिः । कणादेन तु स्मृतिसाधारणकारणमुक्तं यथा "आत्ममनसोः संयोगविशेषात् संस्काराच्च स्मृतिः" सू० "उत्पद्यत इति शेषः संयोगविशेषः प्रणिधानादिसन्निधानम्, एतस्मादसमवायिकारणादात्मनि समवायिनि स्मृतिर्विद्याविशेष उत्पद्यते, निमित्तकारणमाह संस्कारादिति चकारेण व्यापारी पूर्व्वानुभवः समुच्चीयते, अनुभवयाथार्थ्यायाथार्थ्यमियमनुविधत्ते, रज्जुं भुजङ्गतयोपलभ्य पलायितस्य तथैव स्मृतेः नच सततं स्मृतिप्रसङ्गः, संस्कारोद्बोधाधीनत्वात्, तदुक्तं प्रशस्तदेवपादैः "लिङ्गदर्शनेच्छानुस्मरणाद्यपेक्षादात्ममनसोः संयोगविशेषात् पट्वभ्यासादरप्रत्ययजनिताच्च संस्काराद्दृष्टश्रुतानुभूतेषु शेषानुव्यवसायस्मरणेच्छाद्वेषहेतुरतीतविषया स्मृतिः" इति । आर्षं ज्ञानं स्मृतक्ता पृथङ्न लक्षितं, योगिप्रत्यक्षान्तर्भावितं, पदार्थप्रदेशाख्ये तु प्रकरणे तदुक्तं तद्यथा "आम्नायविधातृणामृषीणामतीतानागतवर्त्तमानेष्वर्थेषु धर्म्मादिषु ग्रन्थोपनिबद्धेषु वा लिङ्गाद्यनपेक्षादात्ममनसोः संयोगाद्धर्म्मविशेषाच्च प्रातिभं ज्ञानं यदुत्पद्यते तदार्षम्" इति तच्च कदाचिल्लौकिकानामपि भवति यथा कन्यका वदति "श्वो मे भ्राता गन्तेति हृदयं मे कथयतीति" उप० । संस्कारनाशकानि च रोगकालजन्मान्तरादीनि । न०ब० स्मृतियुक्ते त्रि०

**अविस्मृत** त्रि० न०त० । विस्मृतभिन्ने स्मृते ।

**अविहर्य्यतत्** त्रि० "हर्य्यतिः प्रेप्साकर्म्मेति" यास्कः वि+हर्य्य-अतच् न०त० । अनभिलषिते अनिष्टे "येनाविहर्य्यतक्रतोः" ऋ० १,६३,२ । अविहर्य्यत क्रतोरनभिलषित यज्ञस्य' भा० ।

**अविहित** त्रि० न शास्त्रेण विहितः न०त० । १निषिद्धे । २अकृते च

**अविह्रुत** त्रि० वि+ह्रु—बा० उतच् कित्त्व न०त० । अहिंस्ये । "ताहि चत्रमविह्रुतम्" ऋ० ५,६६,२, "अविह्रुतमहिंस्यम्" भा० ।

**अविह्वल** त्रि० विरोधे न०त० । व्याकुलभिन्ने स्वस्थे ।

**अवी** स्त्री अवत्यात्मानं लज्जया अव—ई । ऋतुमत्याम् ।

**अवीकाश** पु० वीकाशः प्रकाश उपसर्गदीर्घः अभावे न०त० । २प्रकाशाभावे । न०ब० । २प्रकाशशून्ये । [निःशून्ये त्रि० ।

**अवीक्षण** न० अभावे न०त० । १दर्शनाभावे न०ब० । २दर्श-

**अवीक्षित** त्रि० न०त० । १दृष्टभिन्ने । भावे क्त अभावे न० त० । २वीक्षणाभावे न० ।

**अवीचि** पु० नास्ति वीचिः प्रकाशः सुखं वात्र । १नरकभेदे तत्स्वरूपं तत्कारणञ्च भागवते ५स्क० दर्शितं यथा "तामिस्रोऽन्धतामिस्र" इत्याद्युपक्रम्य "अवीचिरयःपानमित्यादिना अष्टाविंशतिनरकान् विभज्य "यस्त्विहानृतं वदति साक्ष्ये, द्रव्यविनिमये, दाने वा कथञ्चित्, स वै प्रेत्य नरके अवीचिमत्यधःशिरा निरवकाशे योजनशतोच्छ्रायात् गिरिमूर्द्ध्नः सम्पात्यते । यत्र जलमिव स्थलमश्मपृष्ठमवभासते तदवीचिमत् तिलशोविशीर्य्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति"—अवीचिमान् अवीचिमयोऽप्यत । २तरङ्गशून्ये जलाशये त्रि० ।

**अवीज** त्रि० नास्ति वीजमस्य । वीजशून्ये १फलादौ ।